कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ पञ्चम काण्डे चतुर्थः प्रश्नः॥

हरिः ओम्॥ देवासुराः संयत्ता आसन्ते न व्यजयन्त स एता इन्द्रस्तनूरपश्यत्ता उपाऽधत्त ताभिर्वै स तनुवमिन्द्रियं वीर्यमात्मन्नधत्त ततो देवा अभवन्पराऽसुरा यदिन्द्रतनूरुपदधाति तनुवमेव ताभिरिन्द्रियं वीर्यं यजमान आत्मन्धत्तेऽथो सेन्द्रमेवाऽग्निग्ं सतनुं चिनुते भवत्यात्मना पराऽस्य भ्रातृव्यो [१] भवति यज्ञो देवेभ्योऽपाऽक्रामत्तमवरुधन्नाऽशक्नुवन्त एता यज्ञतनूरपश्यन्ता उपाऽदधत ताभिर्वै ते यज्ञमवाऽरुन्धत यद्वज्ञतनूरुपदधाति यज्ञमेव ताभिर्यजमानोऽव रुन्धे त्रयस्त्रिग्ं शतमुप दधाति त्रयस्त्रिग्ंशद्वै देवता देवता एवाऽव रुन्धेऽथो सात्मानमेवाऽग्निग्ं सतनुं चिनुते सात्माऽमुष्मिँल्लोके [२] भवति य एवं वेद ज्योतिष्मतीरुप दधाति ज्योतिरेवाऽस्मिन्दधात्येताभिर्वा अग्निश्चितो ज्वलति ताभिरेवैनग्ं समिन्ध उभयोरस्मै लोकयोर्ज्योतिर्भवति नक्षत्रेष्टका उप दधात्येतानि वै दिवो ज्योतीग्ंषि तान्येवाऽव रुन्धे सुकृतां वा एतानि ज्योतीग्ंषि यन्नक्षत्राणि तान्येवाऽऽप्नोत्यथो अनूकाशमेवैतानि [३] ज्योतीग्ंषि कुरुते सुवर्गस्य लोकस्याऽनुख्यात्यै यथ्सग्ग्स्पृष्टा उपदध्याद्वृष्ट्यै लोकमपि दध्यादवर्षुकः पर्जन्यः स्यादसग्ग्स्पृष्टा उप दधाति वृष्ट्या एव लोकं करोति वर्षुकः पर्जन्यो भवति पुरस्तादन्याः प्रतीचीरुप दधाति पश्चादन्याः प्राचीस्तस्मात्प्राचीनानि च प्रतीचीनानि च नक्षत्राण्या वर्तन्ते॥[४]

भ्रातृव्यो लोक एवैतान्येक चत्वारिग्ंशच्च॥5.4.1॥

ऋतव्या उप दधात्यृतूनां क्लुप्त्यै द्वन्द्वमुप दधाति तस्माद्द्वन्द्वमृतवोऽधृतेव वा एषा यन्मध्यमा चितिरन्तरिक्षमिव वा एषा द्वन्द्वमन्यासु चितीषूप दधाति चतस्रो मध्ये धृत्या अन्तः श्लेषणं वा एताश्चितीनां यदृतव्या यदृतव्या उपदधाति चितीनां विधृत्या अवकामनूप दधात्येषा वा अग्नेर्योनिः सयोनि- [५] मेवाऽग्निं चिनुत उवाच ह विश्वामित्रोऽददित्स ब्रह्मणाऽन्नं यस्यैता उपधीयान्तै य उ चैना एवं वेददिति संवथ्सरो वा एतं प्रतिष्ठायै नुदते योऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्यथषष्ठीं चितिं चिनुते षड्वा ऋतवः संवथ्सर ऋतुष्वेव संवथ्सरे प्रति तिष्ठत्येता वा [६] अधिपत्नीर्नामेष्टका यस्यैता उपधीयन्तेऽधिपतिरेव समानानां भवति यं द्विष्यात्तमुपदधध्यायेदेताभ्य एवैनं देवताभ्य आ वृश्चति ताजगार्तिमार्छत्यङ्गिरसः सुवर्गं लोकं यन्तो या यज्ञस्य निष्कृतिरासीत्तामृषिभ्यः प्रत्यौहन्तधिरण्यमभवद्यधिरण्यशल्कैः प्रोक्षति यज्ञस्य निष्कृत्या अथो भेषजमेवास्मै करो- [७] त्यथो रूपेणैवैनगं् समर्धयत्यथो हिरण्यज्योतिषैव सुवर्गं लोकमेति साहस्रवता प्रोक्षति साहस्रः प्रजापतिः प्रजापतेराप्त्या इमा मे अग्न इष्टका धेनवः सन्त्वित्याह धेनूरेवैनाः कुरुते ता एनं कामदुघा अमुत्रामुष्मिँल्लोक उप तिष्ठन्ते॥[८]

सयोनिमेता वै करोत्येकान्न चत्वारिगं्शच्च॥5.4.2॥

रुद्रो वा एष यदग्निः स एतर्हि जातो यर्हि सर्वश्चितः स यथा वथ्सो जातः स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति तस्मै यदाहुतिं न जुहुयादध्वर्युं च यजमानं च ध्यायेच्छतरुद्रीयं जुहोति भागधेयेनैवैनगं् शमयति नाऽऽर्तिमार्छत्यध्वर्युर्न

यजमानो यद्ग्राम्याणां पशूनां [९] पयसा जुहुयाद्ग्राम्यान्पशूङ्छुचार्पयेद्यदारण्यानामारण्याञ्जर्तिलयवाग्वा वा जुहुयाद्वीधुकयवाग्वा वा न ग्राम्यान्पशून्हिनस्ति नाऽऽरण्यानथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेत्यजक्षीरेण जुहोत्याग्नेयी वा एषा यदजाऽऽहुत्यैव जुहोति न ग्राम्यान्पशून् हिनस्ति नाऽऽरण्यानङ्गिरसः सुवर्गं लोकं यन्तो- [१०] ऽजायां घर्मं प्राऽसिञ्चन्थ्सा शोचन्ती पर्णं पराऽजिहीत सो ३ ऽर्को ऽभवत्तदर्कस्याऽर्कत्वमर्कपर्णेन जुहोति सयोनित्वायोद ङ्तिष्ठञ्जुहोत्येषा वै रुद्रस्य दिक्स्वायामेव दिशि रुद्रं निरवदयते चरमायामिष्टकायां जुहोत्यन्तत एव रुद्रं निरवदयते त्रेधाविभक्तं जुहोति त्रय इमे लोकाइमानेव लोका न्थ्समावद्वीर्यान्करोतीयत्यग्रे जुहो- [११] त्यथेयत्यथेयति त्रय इमे लोका एभ्य एवैनं लोकेभ्यः शमयति तिस्र उत्तरा आहुतीर्जुहोति षट्सं पद्यन्ते षड्वा ऋतव ऋतुभिरेवैनग्ं शमयति यदनुपरिक्रामं जुहुयादन्तरवचारिणग्ं रुद्रं कुर्यादथो खल्वाहुः कस्यां वाऽह दिशि रुद्रः कस्यां वेत्यनुपरिक्राममेव होतव्यमपरिवर्गमेवैनग्ं शमय- [१२] त्येता वै देवताः सुवर्ग्या या उत्तमास्ता यजमानं वाचयति ताभिरेवैनग्ं सुवर्गं लोकं गमयति यं द्विष्यात्तस्य सञ्चरे पशूनां न्यस्येद्यः प्रथमः पशुरभितिष्ठति स आर्तिमार्छति॥[१३]

*पशूनां यन्तोऽग्रे जुहोत्यपरिवर्गमेवैनग्ं शमयति त्रिग्ंशच्च॥**5.4.3**॥*

अश्मन्नूर्जमिति परि षिञ्चति मार्जयत्येवैनमथो तर्पयत्येव स एनन्तृप्तोऽक्षुध्यन्नशोचन्नमुष्मिँल्लोक उप तिष्ठते तृप्यति प्रजया पशुभिर्य एवं वेद

तां न इषमूर्जं धत्त मरुतः सग्ं रराणा इत्याहाऽन्नं वा ऊर्गन्नं मरुतोऽन्नमेवाऽव रुन्धेऽश्मग्ग्स्ते क्षुदमुं ते शु- [१४] गृच्छतु यं द्विष्म इत्याह यमेव द्वेष्टि तमस्य क्षुधा च शुचा चाऽर्पयति त्रिः परिषिञ्चन्पर्येति त्रिवृद्वाअऽग्निर्यावानेवाग्निस्तस्य शुचग्ं शमयति त्रिः पुनः पर्येति षट्सं पद्यन्ते षड्वा ऋतव ऋतुभिरेवास्य शुचग्ं शमयत्यपां वा एतत्पुष्पं यद्वेतसोऽपाग्ं [१५] शरोऽवका वेतसशाखया चाऽवकाभिश्च वि कर्षत्यापो वै शान्ताः शान्ताभिरेवाऽस्य शुचग्ं शमयति यो वा अग्निं चितं प्रथमः पशुरधिक्रामतीश्वरो वै तग्ं शुचा प्रदहो मण्डूकेन वि कर्षत्येष वै पशूनामनुपजीवनीयो न वा एष ग्राम्येषु पशुषु हितो नाऽऽरण्येषु तमेव शुचाऽर्पयत्यष्टाभिर्वि कर्ष- [१६] त्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावाऽनेवाग्निर्तस्य शुचग्ं शमयति पावकवतीभिरन्नं वै पावकोऽन्नेनैवाऽस्य शुचग्ं शमयति मृत्युर्वा एष यदग्निर्ब्रह्मण एतद्रूपं यत्कृष्णाजिनं कार्ष्णी उपानहावुप मुञ्चते ब्रह्मणैव मृत्योरन्तर्धत्तेऽन्तर्मृत्योर्धत्तेऽन्तरन्नाद्यादित्याहुरन्यामुपमुञ्चतेऽन्यान्नान्त- [१७] रेव मृत्योर्धत्तेऽवाऽन्नाद्यग्ं रुन्धे नमस्ते हरसे शोचिष इत्याह नमस्कृत्य हि वसीयाग्ंसमुपचरन्त्यन्यं ते अस्मत्तपन्तु हेतय इत्याह यमेव द्वेष्टि तमस्य शुचाऽर्पयति पावको अस्मभ्यग्ं शिवो भवेत्याहाऽन्नं वै पावकोऽन्नमेवाऽव रुन्धे द्वाभ्यामधि क्रामति प्रतिष्ठित्या अपस्यवतीभ्याग्ं शान्त्यै॥[१८]

*शुग्वेतसोऽपामष्टाभिर्वि कर्षति नान्तरेकान्न पञ्चाशच्च॥**5.4.4***॥

नृषदे वडिति व्याघारयति पङ्क्त्याऽऽहुत्या यज्ञमुखमा रभतेऽक्ष्णया व्याघारयति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै यद्वषट्कुर्याद्यातयामाऽस्य वषट्कारः

स्याद्यन्न वषट्कुर्याद्रक्षाग्ंसि यज्ञग्ं हन्युर्वडित्याह परोऽक्षमेव वषट् करोति नाऽस्य यातयामा वषट्कारो भवति न यज्ञग्ं रक्षाग्ंसि घ्नन्ति हुतादो वा अन्ये देवा [१९] अहुतादोऽन्ये तानग्निचिदेवोभयान्प्रीणाति ये देवा देवानामिति दध्ना मधुमिश्रेणाऽवोक्षति हुतादश्चैव देवानहुतादश्च यजमानः प्रीणाति ते यजमानं प्रीणन्ति दध्नैव हुतादः प्रीणाति मधुषाऽहुतादो ग्राम्यं वा एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेणाऽवोक्षत्युभयस्याऽवरुध्यै ग्रुमुष्टिनाऽवोक्षति प्राजापत्यो [२०] वै ग्रुमुष्टिः सयोनित्वाय द्वाभ्यां प्रतिष्ठित्या अनुपरिचारमवोक्षत्यपरिवर्गमेवैनान्प्रीणाति वि वा एष प्राणैः प्रजया पशुभिरृध्यते योऽग्निं चिन्वन्नधिक्रामति प्राणदा अपानदा इत्याह प्राणानेवाऽऽत्मन्धत्ते वर्चोदा वरिवोदा इत्याह प्रजा वै वर्चः पशवो वरिवः प्रजामेव पशूनात्मन्धत्त इन्द्रो वृत्रमहन्तं वृत्रो [२१] हतः षोडशभिर्भोगैरसिनाथ्स एतामग्नयेऽनीकवत आहुतिमपश्यत्तामजुहोत्तस्याऽग्निरनीकवान्थ्स्वेन भागधेयेन प्रीतः षोडशधा वृत्रस्य भोगानप्यदहद्वैश्वकर्मणेन पाप्मनो निरमुच्यत यदग्नयेऽनीकवत आहुतिं जुहोत्यग्निरेवाऽस्याऽनीकवान्थ्स्वेन भागधेयेन प्रीतः पाप्मानमपि दहति वैश्वकर्मणेन पाप्मनो निर्मुच्यते यं कामयेत चिरं पाप्मनो [२२] निर्मुच्येतेत्येकैकं तस्य जुहुयाच्चिरमेव पाप्मनो निर्मुच्यते यं कामयेत ताजक्पाप्मनो निर्मुच्येतेति सर्वाणि तस्याऽनुद्रुत्य जुहुयात्ताजगेव पाप्मनो निर्मुच्यतेऽथो खलु नानैव सूक्ताभ्यां जुहोति नानैव सूक्तयोर्वीर्यं दधात्यथो प्रतिष्ठित्यै॥[२३]

*देवाः प्राजापत्यो वृत्रश्चिरं पाप्मनश्चत्वारिग्ंशच्च॥**5.4.5***॥

उदेनमुत्तरां नयेति समिध आ दधाति यथा जनं यतेऽवसं करोति तादृगेव त त्तिस्र

आ दधाति त्रिवृद्वा अग्निर्यावानेवाऽग्निस्तस्मै भागधेयं करोत्यौदुं बरीर्भवन्त्यूर्ग्वा उदुं बर ऊर्जमेवाऽस्मा अपि दधात्युदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः प्राणै- [२४] रेवैनमुद्यच्छतेऽग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनं चित्तायोद्यच्छते तेनैवैनगुं समर्धयति पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरित्याह दिशो ह्येषोऽनु प्रच्यवतेऽपामतिं दुर्मतिं बाधमाना इत्याह रक्षसामपहत्यै रायस्पोषे यज्ञपतिमाभजन्तीरित्याह पशवो वै रायस्पोषः [२५] पशूनेवाऽव रुन्धे षड्भिर्हरति षड्वा ऋतव ऋतुभिरेवैनगुं हरति द्वे परिगृह्यवती भवतो रक्षसामपहत्यै सूर्यरश्मिर्हरिकेशः पुरस्तादित्याह प्रसूत्यै ततः पावका आशिषो नो जुषन्तामित्याहाऽन्नं वै पावकोऽन्नमेवाऽव रुन्धे देवासुराः संयत्ता आसन्ते देवा एतदप्रतिरथमपश्यन्तेन वै ते ऽप्रत्य- [२६] सुरानजयन्तदप्रतिरथस्याऽप्रतिरथत्वं यदप्रतिरथं द्वितीयो होताऽन्वाहाप्रत्येव तेन यजमानो भ्रातृव्याञ्जयत्यथो अनभिजितमेवाऽभि जयति दशर्चं भवति दशाक्षरा विराड्वराजेमौ लोकौ विधृतावनयोर्लोकयोर्विधृत्या अथो दशाक्षरा विराडन्नं विराड्विराज्येवाऽन्नाद्ये प्रति तिष्ठत्यसदिव वा अन्तरिक्षमन्तरिक्षमिवाऽऽग्नीध्रमाग्नीध्रे- [२७] ऽश्मानं नि दधाति सत्त्वाय द्वाभ्यां प्रतिष्ठित्यै विमान एष दिवो मध्य आस्त इत्याह व्येवैतया मिमीते मध्ये दिवो निहितः पृश्निरश्मेत्याहाऽन्नं वै पृश्न्यन्नमेवाऽव रुन्धे चतसृभिरा पुच्छादेति चत्वारि छन्दागुंसि छन्दोभिरेवेन्द्रं विश्वा अवीवृधन्नित्याह वृधिमेवोपावर्तते वाजानागुं सत्पतिं पति- [२८] मित्याहाऽन्नं वै वाजोऽन्नमेवाऽव रुन्धे सुम्नहूर्यज्ञो देवागुं आ च वक्षदित्याह प्रजा वै पशवः सुम्नं प्रजामेव पशूनात्मन्धत्ते यक्षदग्निर्देवो देवागुं आ च वक्षदित्याह स्वगाकृत्यै वाजस्य मा

प्रसवेनोद्ग्राभेणोदग्रभीदित्याहासौ वा आदित्य उद्यन्नुद्ग्राभ एष निम्रोचन्निग्राभो ब्रह्मणैवात्मानमुद्गृह्णाति ब्रह्मणा भ्रातृव्यं नि गृह्णाति॥[२९]

प्राणैः पोषोऽप्रत्याग्नीध्रे पतिमेष दश च॥5.4.6॥

प्राचीमनु प्रदिशं प्रेहि विद्वानित्याह देवलोकमेवैतयोपावर्तते क्रमध्वमग्निना नाकमित्याहेमानेवैतया लोकान्क्रमते पृथिव्या अहमुदन्तरिक्षमाऽरुहमित्याहेमानेवैतया लोकान्थ्समारोहति सुवर्यन्तो नाऽपेक्षन्त इत्याह सुवर्गमेवैतया लोकमेत्यग्ने प्रेहि [३०] प्रथमो देवयतामित्याहोभयेष्वेवैतया देवमनुष्येषु चक्षुर्दधाति पञ्चभिरधि क्रामति पाङ्क्तो यज्ञो यावानेव यज्ञस्तेन सह सुवर्गं लोकमेति नक्तोषासेति पुरोऽनुवाक्यामन्वाह प्रत्त्या अग्ने सहस्राक्षेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै तस्मै ते विधेम वाजाय स्वाहेत्याहाऽन्नं वै वाजोऽन्नमेवाऽव [३१] रुन्धे दध्नः पूर्णामौदुंबरीग् स्वयमातृण्णायां जुहोत्यूर्ग्वै दध्यूर्गुदुंबरोऽसौ स्वयमातृण्णाऽमुष्यामेवोर्जं दधाति तस्मादमुतोऽर्वाचीमूर्जमुप जीवामस्तिसृभिः सादयति त्रिवृद्वा अग्निर्यावानेवाऽग्निस्तं प्रतिष्ठां गमयति प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुंबरीमा दधात्येषा वै सूर्मी कर्णकावत्येतया ह स्म [३२] वै देवा असुराणाग्ं शततर्हाग्स्तृग्ंहन्ति यदेतया समिधमादधाति वज्रमेवैतच्छतघ्नीं यजमानो भ्रातृव्याय प्र हरति स्तृत्या अछंबट्कारं विधेम ते परमे जन्मन्नग्न इति वैकङ्कतीमा दधाति भा एवाऽव रुन्धे ताग्ं सवितुर्वरेण्यस्य चित्रामिति शमीमयीग्ं शान्त्या अग्निर्वा ह वा अग्निचितं दुहेऽग्निचिद्वाऽग्निं दुहे ताग्ं [३३] सवितुर्वरेण्यस्य चित्रामित्याहैष वा अग्नेर्दोहस्तमस्य कण्व एव श्रायसोऽवेत्तेन ह स्मैनग्ं स दुहे

यदेतया समिधमादधात्यग्निचिदेव तदग्निं दुहे सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह सप्तैवाऽस्य साप्तानि प्रीणाति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः प्रजापते– [३४] राप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाग्ं सृष्ट्या अग्निर्देवेभ्यो निलायत स दिशोऽनु प्राऽविशज्जुह्वन्मनसा दिशो ध्यायेद्दिग्भ्य एवैनमव रुन्धे दध्ना पुरस्ताज्जुहोत्याज्येनोपरिष्टात्तेजश्चैवाऽस्मा इन्द्रियं च समीची दधाति द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवथ्सरः संवथ्सरोऽग्निर्वैश्वानरः साक्षा– [३५] देव वैश्वानरमव रुन्धे यत्प्रयाजानूयाजान्कुर्याद्विकस्तिः सा यज्ञस्य दर्विहोमं करोति यज्ञस्य प्रतिष्ठित्यै राष्ट्रं वै वैश्वानरो विण्मरुतो वैश्वानरग्ं हुत्वा मारुताञ्जुहोति राष्ट्र एव विशमनु बध्नात्युच्चैर्वैश्वानरस्याऽऽ श्रावयत्युपाग्ंशु मारुताञ्जुहोति तस्माद्राष्ट्रं विशमति वदति मारुता भवन्ति मरुतो वै देवानां विशो देवविशेनैवाऽस्मै मनुष्यविशमव रुन्धे सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव रुन्धे गणेन गणमनुद्रुत्य जुहोति विशमेवाऽस्मा अनुवर्त्मानं करोति॥[३६]

अग्ने प्रेह्यव स्म दुहे तां प्रजापतेः साक्षान्मनुष्यविशमेकविग्ंशतिश्च॥5.4.7॥

वसोर्धारां जुहोति वसोर्मे धाराऽसदिति वा एषा हूयते घृतस्य वा एनमेषा धाराऽमुष्मिँल्लोके पिन्वमानोप तिष्ठत आज्येन जुहोति तेजो वा आज्यं तेजो वसोर्धारा तेजसैवाऽस्मै तेजोऽव रुन्धेऽथो कामा वै वसोर्धारा कामानेवाऽव रुन्धे यं कामयेत प्राणानस्यान्नाद्यं वि [३७] च्छिन्द्यामिति विग्राहं तस्य जुहुयात्प्राणानेवास्याऽन्नाद्यं वि च्छिनत्ति यं कामयेत प्राणानस्याऽन्नाद्यग्ं सं

तनुयामिति संततां तस्य जुहुयात्प्राणानेवाऽस्यान्नाद्यगुं सं तनोति द्वादश द्वादशानि जुहोति द्वादश मासाः संवथ्सरः संवथ्सरेणैवाऽस्मा अन्नमव रुन्धेऽन्नं च मेऽक्षुच्च म इत्याहैतद्वा [३८] अन्नस्य रूपगुं रूपेणैवाऽन्नमव रुन्धेऽग्निश्च म आपश्च म इत्याहैषा वा अन्नस्य योनिः सयोन्येवाऽन्नमव रुन्धेऽर्धेन्द्राणि जुहोति देवता एवाऽव रुन्धे यथ्सर्वेषामर्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तम इन्द्रमुत्तरमाहेन्द्रियमेवाऽस्मिन्नुपरिष्टाद्दधाति यज्ञायुधानि जुहोति यज्ञो [३९] वै यज्ञायुधानि यज्ञमेवाऽव रुन्धेऽथो एतद्वै यज्ञस्य रूपगुं रूपेणैव यज्ञमव रुन्धेऽवभृथश्च मे स्वगाकारश्च म इत्याह स्वगाकृत्या अग्निश्च मे घर्मश्च म इत्याहैतद्वै ब्रह्मवर्चसस्य रूपगुं रूपेणैव ब्रह्मवर्चसमव रुन्ध ऋक्च मे साम च म इत्याहै– [४०] तद्वै छन्दसागुं रूपगुं रूपेणैव छन्दागुस्यव रुन्धे गर्भाश्च मे वथ्साश्च म इत्याहैतद्वै पशूनागुं रूपगुं रूपेणैव पशूनव रुन्धे कल्पाञ्जुहोत्यक्लृप्तस्य क्लृप्त्यै युग्मदयुजे जुहोति मिथुनत्वायोत्तरावती भवतोऽभिक्रान्त्या एका च मे तिस्रश्च म इत्याह देवछन्दसं वा एका च तिस्रश्च [४१] मनुष्यछन्दसं चतस्रश्चाऽष्टौ च देवच्छन्दसं चैव मनुष्यच्छन्दसञ्चाऽव रुन्ध आ त्रयस्त्रिगुंशतो जुहोति त्रयस्त्रिगुंशद्वै देवता देवता एवाऽव रुन्ध आऽष्टाचत्वारिगुंशतो जुहोत्यष्टाचत्वारिगुंशदक्षरा जगती जागताः पशवो जगत्यैवाऽस्मै पशूनव रुन्धे वाजश्च प्रसवश्चेति द्वादशं जुहोति द्वादश मासाः संवथ्सरः संवथ्सर एव प्रति तिष्ठति॥[४२]

*वि वै यज्ञस्साम च म इत्याह च तिस्रश्चैकान्न पञ्चाशच्च॥**5.4.8**॥*

अग्निर्देवेभ्योऽपाऽक्रामद्भागधेयमिच्छमानस्तं देवा अब्रुवन्नुप न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणै मह्यमेव वाजप्रसवीयं जुहवन्निति तस्मादग्नये वाजप्रसवीयं जुह्वति यद्वाजप्रसवीयं जुहोत्यग्निमेव तद्भागधेयेन समर्धयत्यथो अभिषेक एवाऽस्य स चतुर्दशभिर्जुहोति सप्त ग्राम्या ओषधयः सप्ता- [४३] ऽऽरण्या उभयीषामवरुध्या अन्नस्यान्नस्य जुहोत्यन्नस्याऽन्नस्यावरुध्या औदुं बरेण स्रुवेण जुहोत्यूर्ग्वा उदुं बर ऊर्गन्नमूर्जैवाऽस्मा ऊर्जमन्नमव रुन्धेऽग्निर्वै देवानामभिषिक्तोऽग्निचिन्मनुष्याणां तस्मादग्निचिद्वर्षति न धावेदवरुधग्ग् ह्यस्याऽन्नमन्नमिव खलु वै वर्षं यधावेदन्नाद्याधावेदुपाऽवर्तेताऽन्नाद्यमेवाऽभ्यु- [४४] पावर्तते नक्तोषासेति कृष्णायै श्वेतवथ्सायै पयसा जुहोत्यहैवाऽस्मै रात्रिं प्र दापयति रात्रियाऽहरहोरात्रे एवाऽस्मै प्रत्ते काममन्नाद्यं दुहाते राष्ट्रभृतो जुहोति राष्ट्रमेवाऽव रुन्धे षड्भिर्जुहोति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठति भुवनस्य पत इति रथमुखे पञ्चाऽऽहुतीर्जुहोति वज्रो वै रथो वज्रेणैव दिशो- [४५] ऽभि जयत्यग्निचितग्ं ह वा अमुष्मिँल्लोके वातोऽभि पवते वातनामानि जुहोत्यभ्येवैनममुष्मिँल्लोके वातः पवते त्रीणि जुहोति त्रय इमे लोका एभ्य एव लोकेभ्यो वातमव रुन्धे समुद्रोऽसि नभस्वानित्याहैतद्वै वातस्य रूपग्ं रूपेणैव वातमव रुन्धेऽञ्जलिना जुहोति न ह्येतेषामऽऽन्यथाहुतिरवकल्पते॥ [४६]

ओषधयस्सप्ताऽभि दिशोऽन्यथा द्वे च॥5.4.9॥

सुवर्गाय वै लोकाय देवरथो युज्यते यत्राकूताय मनुष्यरथ एष खलु वै देवरथो यदग्निरग्निं युनज्मि शवसा घृतेनेत्याह युनक्त्येवैनग्ं स एनं युक्तः सुवर्गं

लोकमभि वहति यथ्सर्वाभिः पञ्चभिर्युञ्ज्याद्युक्तोऽस्याऽग्निः प्रच्युतः स्यादप्रतिष्ठिता आहुतयः स्युरप्रतिष्ठिताः स्तोमा अप्रतिष्ठितान्युक्थानि तिसृभिः प्रातःसवनेऽभि मृशति त्रिवृ- [४७] द्वा अग्निर्यावानेवाऽग्निस्तं युनक्ति यथाऽनसि युक्त आधीयत एवमेव तत्प्रत्याहुतयस्तिष्ठन्ति प्रति स्तोमाः प्रत्युक्थानि यज्ञायज्ञियस्य स्तोत्रे द्वाभ्यामभि मृशत्येतावान्वै यज्ञो यावानग्निष्टोमो भूमा त्वा अस्याऽत ऊर्ध्वः क्रियते यावानेव यज्ञस्तमंततोऽन्वारोहति द्वाभ्यां प्रतिष्ठित्या एकयाऽप्रस्तुतं भवत्यथा- [४८] ऽभि मृशत्युपैनमुत्तरो यज्ञो नमत्यथो सन्तत्यै प्र वा एषोऽस्माँल्लोकाच्च्यवते योऽग्निं चिनुते न वा एतस्याऽनिष्टक आहुतिरव कल्पते यां वा एषोऽनिष्टक आहुतिं जुहोति स्रवति वै सा ताग् स्रवन्तीं यज्ञोऽनु परा भवति यज्ञं यजमानो यत्पुनश्चितिं चिनुत आहुतीनां प्रतिष्ठित्यै प्रत्याहुतयस्तिष्ठन्ति [४९] न यज्ञः पराभवति न यजमानोऽष्टावुप दधात्यष्टाक्षरा गायत्री गायत्रेणैवैनं छन्दसा चिनुते यदेकादश त्रैष्टुभेन यद्द्वादश जागतेन छन्दोभिरेवैनं चिनुते नपात्को वै नामैषोऽग्निर्यत्पुनश्चितिर्य एवं विद्वान्पुनश्चितिं चिनुत आ तृतीयात्पुरुषादन्नमत्ति यथा वै पुनराधेय एवं पुनश्चितिर्योऽग्न्याधेयेन न- [५०] र्ध्नोति स पुनराधेयमा धत्ते योऽग्निं चित्वा नर्ध्नोति स पुनश्चितिं चिनुते यत्पुनश्चितिं चिनुत ऋध्या अथो खल्वाहुर्न चेतव्येति रुद्रो वा एष यदग्निर्यथा व्याघ्रग्ं सुप्तं बोधयति तादृगेव तदथो खल्वाहुश्चेतव्येति यथा वसीयाग्ंसं भागधेयेन बोधयति तादृगेव तन्मनुरग्निमचिनुत तेन नाऽऽर्ध्नोथ्स एतां पुनश्चितिमपश्यत्तामचिनुत तया वै स आर्ध्नोद्यत्पुनश्चितिं चिनुत ऋध्यै॥[५१]

*त्रिवृदथ तिष्ठन्त्यग्न्याधेयेन नाऽचिनुत सप्तदश च||**5.4.10**||*

छन्दश्चितं चिन्वीत पशुकामः पशवो वै छन्दाग्ंसि पशुमानेव भवति श्येनचितं चिन्वीत सुवर्गकामः श्येनो वै वयसां पतिष्ठः श्येन एव भूत्वा सुवर्गं लोकं पतति कङ्कचितं चिन्वीत यः कामयेत शीर्ष्णवानमुष्मिँल्लोके स्यामिति शीर्ष्णवानेवामुष्मिँल्लोके भवत्यलजचितं चिन्वीत चतुःसीतं प्रतिष्ठाकामश्चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति प्रौगचितं चिन्वीत भ्रातृव्यवान्प्रै- [५२] व भ्रातृव्यान्नुदत उभयतः प्रौगं चिन्वीत यः कामयेत प्रजातान्भ्रातृव्यान्नुदेय प्रतिजनिष्यमाणानिति प्रैव जातान्भ्रातृव्यान्नुदते प्रति जनिष्यमाणान्रथचक्रचितं चिन्वीत भ्रातृव्यवान्वज्रो वै रथो वज्रमेव भ्रातृव्येभ्यः प्र हरति द्रोणचितं चिन्वीताऽन्नकामो द्रोणे वा अन्नं भ्रियते सयोन्येवाऽन्नमव रुन्धे समूह्यं चिन्वीत पशुकामः पशुमानेव भवति [५३] परिचाय्यं चिन्वीत ग्रामकामो ग्राम्येव भवति श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति पितृलोक एवर्ध्नोति विश्वामित्रजमदग्नी वसिष्ठेनाऽस्पर्धेताग्ं स एता जमदग्निर्विहव्या अपश्यत्ता उपाऽधत्त ताभिर्वै स वसिष्ठस्येन्द्रियं वीर्यमवृङ्क यद्विहव्या उपदधातीन्द्रियमेव ताभिर्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते होतुर्धिष्णिय उप दधाति यजमानायतनं वै [५४] होता स्व एवाऽस्मा आयतन इन्द्रियं वीर्यमव रुन्धे द्वादशोप दधाति द्वादशाक्षरा जगती जागताः पशवो जगत्यैवाऽस्मै पशूनव रुन्धेऽष्टावष्टावन्येषु धिष्णियेषूप दधात्यष्टाशफाः पशवः पशूनेवाऽव रुन्धे षण्मार्जालीये षड्वा ऋतव ऋतवः खलु वै देवाः पितर ऋतूनेव देवान्पितॄन्प्रीणाति॥[५५]

*प्र भवति यजमानायतनंवा अष्टा चत्वारिग्ंशच्च॥**5.4.11**॥*

पवस्व वाजसातय इत्यनुष्टुक्प्रतिपद्धवति तिस्रोऽनुष्टुभश्चतस्रो गायत्रियो यत्तिस्रोऽनुष्टुभस्तस्मादश्वस्त्रिभिस्तिष्ठग्ग्स्तिष्ठति यच्चतस्रो गायत्रियस्तस्माथ्सर्वाग्श्चतुरः पदः प्रतिदधत्पलायते परमा वा एषा छन्दसां यदनुष्टुक्परमश्चतुष्टोमः स्तोमानां परमस्त्रिरात्रो यज्ञानां परमोऽश्वः पशूनां परमेणैवैनं परमतां गमयत्येकविग्ंश महर्भवति [५६] यस्मिन्नश्व आलभ्यते द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविग्ंश एष प्रजापतिः प्राजापत्योऽश्वस्तमेव साक्षादृध्नोति शक्वरयः पृष्ठं भवन्त्यन्यदन्यच्छन्दोऽन्येन्ये वा एते पशव आ लभ्यन्त उतेव ग्राम्या उतेवाऽऽरण्या यच्छक्वरयः पृष्ठं भवन्त्यश्वस्य सर्वत्वाय पार्थुरश्मं ब्रह्मसामं भवति रश्मिना वा अश्वो [५७] यत ईश्वरो वा अश्वोऽयतोऽप्रतिष्ठितः परां परावतं गन्तोर्यत्पार्थुरश्मं ब्रह्मसामं भवत्यश्वस्य यत्यै धृत्यै संकृत्यच्छावाकसामं भवत्युथ्सन्नयज्ञो वा एष यदश्वमेधः कस्तद्वेदेत्याहुर्यदि सर्वो वा क्रियते न वा सर्व इति संकृत्यच्छावाकसामं भवत्यश्वस्य सर्वत्वाय पर्याप्त्या अनन्तरायाय सर्वस्तोमोऽतिरात्र उत्तममहर्भवति सर्वस्याऽप्त्यै सर्वस्य जित्यै सर्वमेव तेनाऽऽप्नोति सर्वं जयति॥[५८]

*अहर्भवति वा अश्वोऽहर्भवति दश च||**5.4.12**||*

*देवासुरास्ते नर्तव्या रुद्रोऽश्मन्नृषदे वडुदेनं प्राचीमिति वसोर्धारामग्निर्देवेभ्यः सुवर्गाय यत्रा कूताय छन्दश्चितं पवस्व द्वादश||**12**||*

देवासुरा अजायां घर्मं वै गुमुष्टिः प्रथमो देवयतामेतद्वै छन्द सामृध्नोत्यष्टौ पञ्चाशत्॥५८॥

देवासुराः सर्वं जयति॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति पञ्चम काण्डे चतुर्थः प्रश्नः॥